International Journal of Sanskrit Research 2020; 6(2): 88-92

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 88-92
© 2020 IJSR
www.anantaajournal.com
Received: 16-01-2020
Accepted: 20-02-2020

**Dr. Chandrakala R. Kondi**
Asst. Professor, Rashtriya Sanskrit Sansthan, Rajiv Gandhi Campus, Sringeri, Chikkamagaluru Dt. Karnataka, India

**Corresponding Author:**
**Dr. Chandrakala R. Kondi**
Asst. Professor, Rashtriya Sanskrit Sansthan, Rajiv Gandhi Campus, Sringeri, Chikkamagaluru Dt. Karnataka, India

# काव्यहेतुविमर्शः

**Dr. Chandrakala R Kondi**

कार्यकारणभावेन बद्धमिदं जगदिति सर्वे वयं जनीम एव। कार्यं विना कारणं तिष्ठेत्, परन्तु कारणं विना न कार्योत्पत्तिः, घटरूपकार्यस्य मृत्तिकेव पटरूपकार्यस्य च तन्तुरिव। तथैव काव्यरूपकार्यस्यापि किञ्चित्कारणं स्यादेव खलु ? इति चेत् सत्यम्। काव्यस्यापि कारणमालङ्कारिकैः प्रतिपादितमस्ति। तत् किमिति पश्यामः।

प्रतिभा, व्युत्पत्तिः, अभ्यासः-एतेषां समुदायः काव्यकारणमिति केचित् वदन्ति। एतेषु प्रतिभाया एकस्या एव काव्यकारणत्वम्, अवशिष्टं द्वयमपि प्रतिभाकारणमिति केचन। अत एव समुदितकारणवादिनः, प्रतिभाकारणवादिनश्चेति पक्षद्वयं सम्पन्नम्। तत्र समुदितकारणवादिनः भामहः, दण्डी, रुद्रटः, मम्मटाचार्याश्च। वामनः, आनन्दवर्धनः, राजशेखरः कुन्तकश्च प्रतिभाकारणवादिनः।

काव्यहेतौ आन्तरिकं कारणं भवति प्रतिभा। व्युत्पत्त्यभ्यासौ प्रयत्नेन सम्पादनीयौ। तौ यद्यपि प्रतिभायाः प्रकाशनं करिष्यतः (अस्मिन्नर्थ एव जगन्नाथेन तयोः प्रतिभाकारणत्वमुक्तम्) तथापि प्रतिभां न जनयतः। समुदितकारणवादिभिरपि प्रतिभायाः सर्वाधिकता अङ्गीक्रियत एव। मम्मटेनोक्तम्-

शक्तिः कवित्वबीजरूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात् [1] इति।

केवलं प्रतिभायाः काव्यकारणत्वं येऽङ्गीकुर्वन्ति तेषां मतं किञ्चिदवलोकयामः।

### वामनाचार्यः

लोको-विद्या-प्रकीर्णं च काव्याङ्गानीति वामनेन यद्यपि भामह इव उपादान-व्युत्पत्ति-अभ्यासान् काव्यकारणानीति स्वीकरोति तथापि,'कवित्वबीजं प्रतिभानम्' [2] इत्युक्त्वा काव्यस्य मूलकारणं प्रतिभैवेति उद्घोषितवान्। अन्ये सर्वेऽपि काव्यस्योपकारकाः, न तु कारणानीति तन्मतम्। तस्य वृत्तावपि प्रतिभाया एव काव्यकरणत्वं तेन समर्थितम् – 'यस्माद्बीजं विना काव्यं न निष्पद्यते, निष्पन्नं वा अवहासायनं स्यात्। यथा बीजं विना नाङ्कुरोत्पत्तिसम्भवस्तथैव कवित्वबीजभूतां प्रतिभां विना काव्यपादपस्यासम्भवः। यदि काव्यरचनाचापल्येन कश्चित् किमपि लिखति तर्हि तत्तु काव्यज्ञैरुपहस्यत एव। अतः वामनस्य मते काव्यबीजं प्रतिभैव।

**आनन्दवर्धनाचार्यः**

यद्यपि आनन्दवर्धनः काव्यहेतून् स्वतन्त्रतया न विवेचितवन् तथापि सः प्रतिभायाः महत्त्वं बहुत्र प्रकटीकृतवान्। शक्ति-व्युत्पत्त्योर्मध्ये शक्तिरेव महीयसीति सोऽभिप्रैतिट्ट

अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः।
यस्त्वशक्तिकृतो दोषः झटित्येवावभासते ॥ [3]

यदि कविः प्रतिभावान् भवति तर्हि तस्य कृते वर्ण्यविषयस्य न्यूनता कदापि न भवति। सः पुरातनविषयानपि नवीनरूपेण प्रदर्शयितुं प्रभवति। परन्तु प्रतिभाहीनस्य न किमपि शक्यम्।

'न काव्यार्थविरामोऽस्ति यदि स्यात् प्रतिभा गुणः' इत्यादिभिः विचारैः स्पष्टं प्रतीयते यत् आनन्दवर्धनस्याभिप्रायेऽपि प्रतिभैव काव्यस्य प्रमुखं कारणमिति।

**राजशेखरः**

राजशेखरः काव्यमीमांसायाम् अत्यन्तं विस्तृतरूपेण काव्यकारणविचारं प्रस्तुतवान्। उपयोगस्य उपदेयतायाश्च दृष्ट्या प्रतिभा-व्युत्पत्त्योः द्वयोरपि श्रेष्ठतां स मानयति –'प्रतिभाव्युत्पत्ती मिथः समवेते श्रेयस्यौ इति य।यावरीयः।[4]

अतः एताभ्यां द्वाभ्यामपि विभूतिभ्यां सम्पन्न एव कविरुत्तमः। अनयोराधारेण कवेः नाम अपि भिन्नं भवति। प्रतिभावान् कविः काव्यकविरित्युच्यते, व्युत्पत्त्याधारेण तु शास्त्रकविरित्युच्यते। अनयोः कस्यापि न्यूनतां वक्तुं न पारयामः। परन्तु कारणताविवेचनावसरे राजशेखरः स्पष्टतया प्रतिभाया एव काव्यकारणत्वमुद्घोषयति -

सा शक्तिः केवलं काव्ये हेतुः इति यायावरीयः [5] इति।

सामान्यतः सर्वे आचार्याः शक्तिप्रतिभयोरेकत्वं मानयन्ति। परं राजशेखरः तयोर्मध्ये परस्परं भेदं वदति। शक्तेः स्वरूपनिर्णयावसरे स निगदति यत् समाधिः अर्थात् मनसः एकाग्रता आन्तरः प्रयत्नः भवति, अभ्यासस्तु बाह्यः। एतौ द्वावपि शक्तिमुद्भासयन्ति। प्रतिभा-व्युत्पत्ती द्वारा तस्याः शक्तेः विविधरूपेण प्रसारो भवति। शक्तिमति एव प्रतिभा दृश्यते, शक्तिमांश्चैव व्युत्पन्नो भवति।

अस्य तात्पर्यमेवं वक्तुं शक्यते –'प्रतिभावतोऽपि यदि मनस एकाग्रता नास्ति तर्हि तस्य प्रतिभा अन्त एव भवति, प्रसारस्तस्य न भवति। प्रतिभावानपि सदाऽपि कविर्न भवति। यदा तस्य मनः एकाग्रं भवति तदा सा मनश्शक्तिः तस्य प्रतिभां काव्यरूपेण प्रवाहयति। तदा सहृदयाः रसास्वादं कुर्वन्ति। एवं प्रतिभा मनसि निहिता भवति, शक्तिः तस्याः प्रतिभायाः प्रकाशने साधनं भवति इत्यभिप्रायेण तयोः भेदस्तेन दर्शितः।

एवं राजशेखरोक्ता शक्तिः एकं व्यापकं तत्त्वम्। तदपेक्षया सीमिता भवति प्रतिभा। यद्यपीयं प्रतिभा अदृष्टपदार्थानपि प्रत्यक्षीकरोति तथापि शक्तिरितोऽप्यधिका भवति। परन्तु राजशेखरोऽपि उपचारेण प्रतिभेत्यर्थ एव शक्तिरिति शब्दं प्रयुङ्क्तेट्ट शक्तिशब्दश्चायमुपचरितः प्रतिभाने वर्तते इति। एवं राजशेखरस्य मतेऽपि काव्यहेतुत्वं शक्तेः प्रतिभाया वैव दत्तमस्ति।

**कुन्तकाचार्यः**

सम्पूर्णकाव्यविधानस्य केन्द्रबिन्दुरेव प्रतिभेति कुन्तकोऽभिप्रैति -

यद्यपि द्वयोरप्येतयोस्तत् प्राधान्येनैव वाक्योपनिबन्धः, तथापि कविप्रतिभाप्रौढिरेव प्राधान्येनावतिष्ठते। [6]

यद्यपि शब्दार्थप्राधान्येनैव काव्यं विरच्यते तथापि कविप्रतिभायाः प्रौढतैव प्राधान्येन व्यवस्थिता भवति। सुकुमारमार्गनिरूपणावसरे सः प्रतिभामेवं निर्दिशति – 'यत्किञ्चनापि वैचित्र्यं तत्सर्वं प्रतिभोद्भवम् इति।

सुकुमारमार्गे यद्यद् वैचित्र्यं परिलक्ष्यते तत्सर्वं प्रतिभया ऐव योगदानम्। श्ब्दार्थयोः किञ्चन अपूर्वसौन्दर्यस्य प्रस्फुरणं यथा भवेत्तथाकरणमेव प्रतिभायाः कार्यम् ट्ट

प्रतिभा प्रथमोद्भेदसमये यत्र वक्रता।
शब्दाभिधेययोरन्तः स्फुरतीव विभाव्यते ॥ [7]

अम्लानप्रतिभयैव शब्दार्थयोः नवीनः कश्चन चमत्कारः प्रस्फुटितो भवति। अर्थात् काचनानिर्वचनीयातिशयता शब्दार्थयोरुत्पद्यते प्रतिभया। ऐवं काव्यकारणताविचारे कुन्तकः प्रतिभायाः कृते ऐव प्राथम्यं दत्तवान्। तस्य मते पूर्वजन्मनः इहजन्मनश्च संस्काराणां सम्पूर्णः परिपाक एव प्रतिभा –'प्राक्तनाद्यतनसंस्कारपरिपाकप्रौढा प्रतिभा'। मानवस्य जन्मान्तरसंस्कार एव साररूपेण सञ्चितो भूत्वा प्रतिभां निर्माति।

**पण्डितराजजगन्नाथः**

प्रतिभां निरूपयन् जगन्नाथः वदति –'सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः इति।

अर्थात् काव्यरचनावसरे कविमस्तिष्के समुचितशब्दार्थयोरुपस्थितिरेव प्रतिभा। अस्यां प्रतिभायां वर्तमानं प्रतिभात्वमेव काव्यकारणतायाः अवच्छेदकम्। अर्थात् प्रतिभात्वं विविधरूपासु प्रतिभासु

प्रतिभेत्येकाकारप्रतीतिकरं तत्त्वम्। एवं प्रतिभात्वं जातिरित्यङ्गी-क्रियते। प्रतिभाया अपि द्वे कारणे स्तः -

१. अदृष्टम्

२. व्युत्पत्तिः अभ्यासश्च।

प्रतिभा कदाचित् अदृष्टेनोत्पाद्यते, कदाचिच्च व्युत्पत्त्यभ्यासाभ्याम्।

**प्रतिभायाः स्वरूपम् -** प्रज्ञाया विशेषरूपं भवति प्रतिभा। प्रायः सर्वे आचार्याः प्रज्ञायाः माध्यमेनैव प्रतिभां परिचाययन्ति। काव्यशास्त्रे प्रतिभायाः सर्वाधिकं महत्त्वं दत्तमस्ति। आचार्यदण्डिनः मते प्रतिभा पूर्वजन्मनः वासनया सह सम्बद्धा –'पूर्ववासनागुणानुबन्धि प्रतिभानमद्भुतम्। [8] वामनोऽपि प्रतिभां जन्मान्तरगतसंस्कारविशेष इत्येव निरूपितवान् -

कवित्वबीजं प्रतिभानम्, जन्मान्तरागतसंस्कारविशेषः कश्चित् इति।

अभिनवगुप्तोऽपि प्रतिभां प्राक्तनसंस्कार इत्येव निर्दिशति। सा च प्रतिभा अपूर्ववस्तुनिर्माणे समर्था -

अनादिप्राक्तनसंस्कार प्रतिभानमथः [9]

प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा [10]

कविहृदये उचितशब्दानाम्, अर्थानाम्, अलङ्काराणाम्, अन्यवक्तव्यस्य वा कौशल्योद्भासकतत्त्वमेवोपमेति राजशेखरः। मम्मटमतानुसरं प्रतिभा कश्चन प्राक्तनसंस्कारः यस्यां च काव्यकलायाः अङ्कुरो विद्यते।

एवं प्रतिभाया विषये नैकं मतं विद्यते। परन्तु सर्वस्यापि सारमिदमेव यत् मनुष्यस्य मौलिकशक्तेः, बौद्धिकशक्तेश्च नामैव प्रतिभेति, या जन्मान्तरसंस्कारस्य परिपाकेन निष्पद्यते, यस्यश्च नित्यनूतनपदार्थाः उन्मिषन्ति।

प्रतिभा मनोविज्ञानान्तर्गतत्वेन विवृता पाश्चात्यविद्वद्भिः। मनोविज्ञनानुसारं मेधायाः अत्युन्नतः स्तरः असामान्या मानसिकी शक्तिर्वा [11]। भारतीयकाव्यशास्त्र-प्रतिनिधीनामाचार्याणामपि मतानां तात्पर्यमपीदमेव यत् प्रतिभा असाधारणी, जन्मान्तरागता च काचन दैवी शक्तिः या नियतिकृतनियमरहिता, अपूर्ववस्तुनिर्माणक्षमा च।

एवं प्रतिभाकारणवादिनां मते प्रतिभाजन्यं काव्यम्। तर्हि तेषां मते अभ्यास-व्युत्पत्त्योः किं स्थानम् ? इति चेत् प्रतिभायाः कारणे इत्येवोत्तरं दीयते। (जगन्नाथस्याभिप्रायः उत्तचरः।) यथा बीजे वृक्षः सूक्ष्मरूपेण वर्तते, जलादिभिः सिञ्चितः सन् बृहदाकारेण वर्धते, तथैव जन्मनैव सूक्ष्मरूपेण वर्तमाना प्रतिभा अभ्यास-व्युत्पत्त्योः साहाय्येन काव्यनिर्माणकुशला भवति। एवम् अभ्यासव्युत्पत्तिभ्यां सहकृतायाः प्रतिभायाः काव्यकारणत्वमेतेषां विवक्षितम्।

**समुदितकारणवादः**

प्रतिभाकारणवादिनां मतं विरुध्य आचार्याः भामह-दण्डी-रुद्रट-मम्मटाः प्रतिभया सह अभ्यासव्युत्पत्त्योरपि काव्यकरणत्वं प्रतिपादयन्ति। अर्थात् एतेषां समुदिततानां काव्यकारणत्वम्। परन्त्वत्र विचारोऽयमवगन्तव्यो यत् समुदितकारणवादिनोऽपि प्रतिभायाः प्राधान्यं प्राशस्त्यञ्च बहुमन्यन्त इति। तथापि प्रतिभाकारणवादिभिः व्युत्पत्त्यभ्यासौ काव्यकारणबहिर्भूतौ, एतेषां मते त्वन्तर्भूतावित्येव व्यत्यासः।

**भामहः**

भामहस्य मतानुसारं प्रतिभातत्त्वं काव्यनिर्माणेऽपरिहार्यम्, परन्तु व्युत्पत्त्यभ्यासावपि तत्समानरूपेणैव काव्यस्य कारणे भवतः -

गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्।
काव्यं तु जायते जातु कस्यचित् प्रतिभावतः ॥
शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनम्।
विलोक्यान्यनिबन्धांश्च कार्यः काव्यक्रियादरः ॥

अत्र यद्यपि भामहेन प्रतिभैव काव्यनिर्माणेऽनिवार्यतां भजते इत्यभिप्रेतं तथापि कृत्वा तद्विदुपासनम् इत्यनेन व्युत्पत्तिमपि तदङ्गत्वेन भावयतीति ज्ञायते। तथैव कार्यः काव्यक्रियादरः इत्यनेन अभ्यासं सङ्केतितवान्। एवं काव्यनिर्माणदिशायां समुदितकारणवादिषु प्रथमतया परिगणनीयोऽयम्।

**दण्डी**

दण्डिन इयं विशिष्टताऽत्रोल्लेखनीया यत् काव्यकारणेषु प्रतिभायाः आधिक्यं निराकृतमनेनेति। एते समुदितरूपेणैव काव्यकारणानि भवन्ति, न तत्र प्रतिभायाः आधिक्यं वर्तते। यतो हि पूर्ववासनाफलरूपेण वर्तमानायाः प्रतिभाया अभावेऽपि व्युत्पत्त्यभ्यासाभ्यां कविकर्मणि साफल्यं प्राप्यते-

न विद्यते यद्यपि पूर्ववासना
गुणानुबन्धि प्रतिभानमद्भुतम्।
श्रुतेन यत्नेन च वागुपासिता
ध्रुवं करोत्येव कमप्यनुग्रहम् ॥

परन्तु अन्ततो गत्वा विचारिते तु दण्डिनोक्तेयं स्थितिर्वैकल्पिकी। तस्य मतेऽपि स्वाभाविकी प्रतिभा, निर्मलं शास्त्रज्ञानं अमन्दाभ्यासश्चैव कविकर्मकारणमिति तेनैवोक्तेनानेन श्लोकेन स्पष्टीक्रियते -

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसंपदः ॥

इति। अभ्यासव्युत्पत्त्योः काव्यकारणत्वानङ्गीकर्तृणां मतं विरोद्धुमनेन पूर्वतनाभिप्राय अभिहित इति भाति।

**रुद्रटः**

रुद्रटोऽपि काव्यसङ्घटनायां त्रयाणामपि व्यापारत्वमनुमन्यते -

तस्यासारनिरासात्सारग्रहणाच्च चारुणः करणे।
त्रितयमिदं व्याप्रियते शक्तिर्व्युत्पत्तिरभ्यासः ॥

असारनिरासः, सारग्रहणमृट्ट एतौ साधयितुं शक्तिः, व्युत्पत्तिः, अभ्यासःट्ट एतेषां सर्वेषामपि व्यापारः अत्यन्तमावश्यकः। सहजोत्पाद्यभेदेन प्रतिभा द्विविधेति तन्मतम्। जन्मसिद्धा प्रत्तिभा सहजा, श्रेयस्करी च। व्युत्पत्त्यभ्यासद्वारा लब्धा उत्पाद्या, या जन्मसिद्धां संस्करोति।

**मम्मटः**

आचार्यमम्मटमतानुसारं प्रतिभापरपर्याया शक्तिः कवित्वस्य बीजरूपः संस्कारविशेशेषः। लोकव्यवहार-शास्त्र-काव्यादीनां पर्यालिलोचनया लब्धा व्युत्पत्तिः, काव्यज्ञानां शिक्षया अभ्यासः-एतानि सम्मील्य काव्यस्य कारणं भवति -

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥ 12

एतस्याः कारिकायाः वत्तिः मम्मटस्य सम्पूर्णमभिप्रायं स्पष्टतया प्रकटीकरोति -

शक्तिः कवित्वबीजरूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत्, प्रसृतं वा उपहसनीयं स्यात्। लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य, शास्त्राणां छन्दोव्याकरणाभिधानकोश-कलाचतुर्वर्गगज-तुरगखड्गादिलक्षणग्रन्थानाम्, काव्यानां च महाकविनिबन्धानाम्, आदिग्रहणादितिहासादीनां च विमर्शनाद्व्युत्पत्तिः। काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिताः न् तु व्यस्ताः काव्यस्य उद्भवे निर्माणे समुल्लासे च हेतुः न तु हेतवः।

इतरसाधारणतया यद्यपि शक्तेः अर्थात् प्रतिभायाः प्रशंसा अनेनापि कृता वर्तते तथापि व्युत्पत्त्यभ्यासयोरपि काव्यकारणाङ्गत्वेन पर्यगणयदिति विशेषोऽस्य। अन्तःसम्बन्धिन एतेंऽशा इति तस्योद्देशोऽवगम्यते। यतो हि अन्ये सर्वेऽपि प्रतिभेव व्युत्पत्त्यभ्यासावपि काव्यकारणे इति अभिप्रयन्ति। परन्तु मम्मटः काव्यस्य एकमेव हेतुमङ्गीकरोति। तस्मिन् हेतौ प्रतिभा-व्युत्पत्ति-अभ्यासाश्च त्रयोऽशाः। नैकेनापि विना काव्योत्पत्तिः। तेष्वंशेषु प्रतिभायाः महत्त्वं तु एतावता विवरणेन विदितचरम्। तर्हि व्युत्पत्त्यभ्यासौ कथं काव्यकारणांशौ भवतः इति विमर्शयामः।

लोके कलाकारेण निर्मितं यत्किमपि वस्तु दृष्ट्वा वयं न केवलं तस्य प्रतिभां प्रशंसामः परन्तु तन्निर्माणे तस्य नैपुण्यमपि स्तुमः। यतो हि नैपुण्यरहितात् निपुणस्य निर्माणकौशलमन्यदेव भवति। मुखेन यद्यपि वक्तुमशक्यं तथापि अस्मद् हृदयं तज्जानाति। निपुणेन निर्मितं वस्तु यावत्परितोषं जनयति तावत् नैपुण्यरहितस्य न। काव्यविषयेऽपि तथैव। निपुणेन कविना विरचितस्य अनिपुणेन विरचितस्य च काव्ययोः व्यत्यासं झटित्येवावगच्छति सहृदयानां स्वान्तम्। एकमेव शास्त्रीयमुदाहरणं दीयते मया एतत्स्पष्टीकर्तुम्। काव्यस्यात्मा ध्वनिरिति ब्रुवता आनन्दवर्धनेन रसध्वनिरिव रसाभास-भाव-भावाभासादीनामपि ध्वनिः उत्तमकाव्यान्तर्गतत्वेन निरूपितोऽस्ति। रसस्तु औचित्येनैवास्वाद्यते। परन्तु रसाभासोऽनौचित्यजन्यः। तर्हि कथमनौचित्यजन्यस्य ध्वनिकाव्ये प्रवेशः ? कथं वा तस्य काव्यात्मत्वम् ? इति सन्देहस्तु नितान्तमुत्पद्यत एव। परन्तु निपुणः कविः अनौचित्यजन्यरसाभासभावाभासानपि रस इवास्वादयोग्यान् करोति। अनिपुणेन प्रयुक्तास्तु ते आभासत्वेनैव प्रतीत्य काव्यस्यावद्यत्वं सम्पादयेयुः। अर्थात् काव्यनिर्माणं केवलं प्रतिभावतोऽपि भवेत्। परन्तु सप्रयोजनकाव्यनिर्माणं निपुणस्यैव कवेर्भवेत्। वस्तुनां विषये सम्यग्ज्ञानं रसादिविषयकः दृढतरः संस्कारश्च व्युत्पत्तिरिति कथ्यते। पाण्डित्यस्यापि व्युत्पत्तिपर्यायत्वेन स्वीकर्तुं शक्नुमः। यदा प्रतिभावान् कविः चराचरस्य जगतो व्यवहारमवधानेन निरीक्षते तदा तस्य अनेकेषु विषयेषु अनुभूतिर्जायते। पिङ्गलादि छन्दश्शास्त्रं, पाणिनीयादि व्याकरणशास्त्रं, शब्दकोशः, नृत्यगीतादि चतुःषष्ठिकलाः, मनुस्मृत्यादिधर्मशास्त्रम्, इत्यादीनामनुशीलनेन

विविधविद्यासु व्युत्पत्तिर्जायते। वाल्मीक्यादिकवीनां ग्रन्थानां अध्ययनात् रसादिविषयकसंस्कारः दृढतरो भवति, काव्यशैल्यादीनां सम्यक् बोधो जायते, रुचिरपि परिष्कृता भवति। एवं कविः इतिहासादिग्रन्थैः आख्यानादीनाम् आधारं सङ्ग्राह्य काव्यनिर्माणं करोति चेत् तस्य काव्यमुत्कृष्टं भवेत्। एवं काव्यकारणत्वेन सत्यामपि शक्तौ काव्यशास्त्राद्यालोचनरूपनिपुणताया अभावे काव्यस्य प्रवृत्तिनिवृत्त्यात्मकोपदेशपुरःसरं चतुर्थपुरुषार्थस्यावाप्तिरत्र न घटते। किं चतुर्थस्यैव प्रथमस्याप्यवाप्तिर्दुर्घटा।

तथैवाभ्यासोऽपि। यद्यपि अपारे काव्यसंसारे कविरेव प्रजापतिरिति उक्तमस्ति केनचित्तथापि दोषदूरस्य काव्यस्य निर्माणार्थं तज्ज्ञानां मार्गदर्शनं अपेक्षत एव। तादृशमार्गदर्शनेनैव निर्दुष्टकाव्यं निर्मातुं प्रभवति कविः। यतो हि काव्यरहस्यमभ्यासेन विना न कथञ्चिदपि ज्ञातुं शक्यते। काव्ये मुख्यतमो भवति रसः। तस्योपकारकाः भवन्ति अलङ्कारादयः। वर्णनानिपुणः कविरिति वचनानुसारं वर्णनोद्देशेन तादृशालङ्काराः प्रयोक्तव्याश्चेत् अभ्यासं विना कथं वा शक्येत् ?

इष्टसाधनताज्ञानं, कृतिसाध्यताज्ञानं, बलवदनिष्टाननुबन्धिज्ञानञ्च प्रवृत्तिं प्रति कारणानि। प्रतिभावतोऽपि व्युत्पत्त्यभ्यासाभ्यां विरहितेन इष्टसाधकं काव्यं कथं वा निर्मीयते ? कथं वा इयं कृतिर्मया साध्यत इति चिन्तयेत् सः ? दोषबाहुल्यादपयशोरूपानिष्टस्य सम्भवज्ञाने सति बलवदनिष्टाननुबन्धित्वज्ञानं कथमुत्पद्यते। एवं प्रवृत्त्यभावे कथं काव्यनिर्माणम् ? अत एव समुदितानामेतेषां हेतुत्वम्। प्रतिभया विना व्युत्पत्त्यभ्यासयोः, व्युत्पत्तिं विना प्रतिभाभ्यासयोः, अभ्यासं विना प्रतिभाव्युत्पत्त्योः काव्यकारणत्वं न सम्भवति। काव्यहेतौ यदा न्यूनता भवति तदा काव्येऽपि न्यूनता अवश्यं भवत्येव। तादृशकाव्ये न केषामपि प्रवृत्तिः। अप्रयोजकमेव तद्भवतीति तात्पर्यम्। अत एव दण्डचक्रचीवरादिन्यायेनात्र तेषां हेतुत्वम् अर्थत् परस्परसापेक्षतया, न तु तृणारणिमणिन्यायेन निरपेक्षतया।

एवं यद्यपि काव्यकारणत्वेन प्रतिभैव अनेकैरालङ्कारिकैरङ्गीकृता तथापि व्युत्पत्त्यभ्यासाभ्यां सहकृतायाः प्रतिभायाः कारणत्वं वक्तुमुचितम् इति शम्।

## संदर्भ


1. काव्यप्रकाशः, प्रथमोल्लासः ।
2. काव्यालङ्कारसूत्रवृत्तिः, सूत्रम्-१.१६
3. ध्वन्यालोकः, तृतीय उद्योतः
4. काव्यमीमांसा
5. काव्यमीमांसा
6. वक्रोक्तिजीवितम्
7. वक्रोक्तिजीवितम् -१/३४
8. काव्यादर्शः १/१०४
9. अभिनवभारती खण्डः – १
10. ध्वन्यालोक लोचनम्
11. The new Dictionary of psychology
12. काव्यप्रकाशः –प्रथमोल्लासः